# सम्पूर्णानन्द-संस्कृत-विश्वविद्यालयः, वाराणसी

## दीक्षान्तमहोत्सवस्याधिसूचना

सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्य **द्विचत्वारिंशत्तमो दीक्षान्तमहोत्सवः** 26.09.2024 दिनाङ्के विश्वविद्यालयस्य मुख्यभवने सम्पत्स्यते।

अस्मिन्नवसरे 2024 वर्षीयविद्यावारिध्याचार्यशास्त्रिशिक्षाशात्र्यायुर्वेदाचार्यग्रन्थालयविज्ञान-पत्रकारिता एवं जनसञ्चारविज्ञानस्नातकोत्तरपरीक्षां समुत्तीर्णेभ्यः स्नातकेभ्य उपाधयः प्रदास्यन्ते।

सम्बद्धाः स्नातका एतद्द्वारा सूच्यन्ते यद् 18.09.2024 दिनाङ्कं यावद् अधस्तनं स्वीकृतिपत्रं प्रपूर्य कुलसचिवस्य कार्यालये प्रेषयन्तु। 19.09.2024 एवं 20.09.2024 दिनाङ्कयोः 10 वादने स्वयमुपस्थाय अधोनिर्दिष्टानि प्रारूपाणि प्रपूरितानि प्रदर्श्य पञ्चाशदधिकशतद्वय- (250) रूप्यकाणि च प्रदाय परिधानवस्त्राण्युपाधींश्च लभेरन्।

**सूचना-** अत्र संलग्नं पत्रत्रयं वर्तते। तत्र प्रथमं प्रमाणपत्रं दीक्षान्तमहोत्सवे प्रवेशाय, यद् विद्यालयीयस्नातकेभ्यः प्रधानाचार्यः, स्वतन्त्रस्नातकेभ्यस्तु शास्त्रिपरीक्षान्तं स्वीकृतस्य महाविद्यालयस्य प्रधानाचार्यः, अथवा शिक्षाविभागस्य निरीक्षकः, अथवा हाईस्कूलकक्षान्तं स्वीकृतस्य विद्यालयस्य प्रधानाध्यापको यद् उत्तीर्णपरीक्षाया आवेदनपत्रं प्रेषितम् आसीत्, दास्यति। द्वितीयं पत्रं छात्रः 19.09.2024 दिनाङ्कात् पूर्वं कुलसचिवकार्यालये पूरयित्वा प्रापयिष्यति। तृतीयं पत्रं विद्यालयीयस्नातकेभ्यः प्रधानाचार्यः, स्वतन्त्रच्छात्रेभ्यश्च निर्धारितोऽधिकारी दास्यति।

**विशेषः-** स्नातकैः द्वितीयं स्वीकृतिपत्रं तृतीयञ्च कुलसचिवस्य कार्यालये 19.09.2024 दिनाङ्कात् पूर्वं प्रेषणीयम्, प्रथमञ्च सहैवानेयम्, तत् प्रदर्श्य उत्सवप्रवेशपत्रं स्नातकीयपरिधानञ्च ग्रहीतव्यम्।

10/9/2024

**कुलसचिवः**

सम्पूर्णानन्द-संस्कृत-विश्वविद्यालयस्य, वाराणसी

(1)

## प्रधानाचार्यप्रमाणपत्रम्

(इदम् 26.09.2024 दिनाङ्के सहैवानेतव्यम्)

श्री ............................................ नामा/नाम्नी ................................................................ नाम्नः पुत्रः/पुत्री सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्य .................................. विषये ...................... परीक्षां ..................... विद्यालयतः/स्वतन्त्रो वा उत्तीर्णवान्/उत्तीर्णवती अयं/इयं दीक्षान्तमहोत्सवे प्रवेशदानेनानुग्राह्यः/ह्या, इति प्रमाणयति।

स्नातकस्य हस्ताक्षरम् | प्रमाणयितुः हस्ताक्षरम्

दिनाङ्क | दिनाङ्कः

मुद्रा

---

(2)

## स्वीकृतिपत्रम्

(इदम् 23.09.2024 दिनाङ्कं यावत् कुलसचिवस्य कार्यालये प्रापणीयम्)

श्रीमन्तः कुलसचिवमहोदयाः!

सम्पूर्णानन्द-संस्कृत-विश्वविद्यालयस्य, वाराणसी

महाशयाः,

दीक्षान्तमहोत्सवस्य सूचनाऽधिगता। निर्देशानुसारम् 23.09.2024 एवं 24.09.2024 दिनाङ्कयो 10 वादनवेलायां सम्पूर्णानन्द-संस्कृत-विश्वविद्यालये प्रवेशपत्रग्रहणाय 26.09.2024 दिनाङ्के उत्सवे सम्मिलितुञ्च उपस्थितो/उपस्थिता भवितास्मि।

छात्रनाम .............................. परीक्षा .................... विषयः .................... अनुक्रमांक........................श्रेणी .....................

दिनाङ्क

भवदीयः/भवदीया

.......................................................

.......................................................

पूर्णसङ्केतः .......................................................

---

(3)

## प्रधानाचार्यस्य प्रमाणपत्रम्

(इदं कुलसचिव कार्यालये 23.09.2024 दिनाङ्के प्रापणीयम्)

श्री ..................................................नामा/नाम्नी ........................................................ नाम्नः पुत्रः/पुत्री सम्पूर्णानन्दसंस्कृत-विश्वविद्यालयस्य .............................. विषये .......................... परीक्षां विद्यालयतः/स्वतन्त्रो वा उत्तीर्णवान्/उत्तीर्णवती यस्य/यस्या अनुक्रमाङ्कः .......................... अस्ति। अयं/इयं दीक्षान्तमहोत्सवे प्रवेशदानेनानुग्राह्यः/ह्या, इति प्रमाणयति।

प्रमाणयितुः हस्ताक्षरम्

मुद्रा